**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा – २०२१**

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – नव्यव्याकरणम्** | **सत्रम् – ४** | **समयः – १०:०० तः १२:००** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – परमलघुमञ्जूषा व्युत्पत्तिवादश्च** | |

**सूचना- निम्नलिखितेषु एकादशसु प्रश्नेषु केषाञ्चित् पञ्च प्रश्नाः विधेयाः।**

**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ निम्नलिखितेषु किमपि प्रश्नद्वयं स्वपाठ्यपुस्तकानुसारं समाधेयम्। १०**

१ लिङ्गस्य संख्यायाश्च नामार्थत्वं प्रतिपादनीयम्।

२ किं नाम परिनिष्ठितत्वम्? सोदाहरणं लिखन्तु।

३ आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः।। अस्याः कारिकायाः व्याख्या कार्या।

४ समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने।। अस्याः कारिकायाः व्याख्या कार्या।

**प्रश्नः २ नामार्थविषयकं मीमांसकमतं प्रस्तुत्य तत्खण्डनं करणीयम्। १०**

**प्रश्नः ३ नामार्थविषयकं वैयाकरणमतं प्रतिपादनीयम्। १०**

**प्रश्नः ४ समासवृत्तिविषयकं नैयायिकमीमांसकमतं यथाग्रन्थम् उपस्थापनीयम्। १०**

**प्रश्नः ५ समासवृत्तौ शक्तिविषयकं वैयाकरणमतम् उल्लेखनीयम्। १०**

**प्रश्नः ६ निम्नलिखितेषु द्वयोः गद्यखण्डयोः सप्रसङ्गं यथाग्रन्थं व्याख्या कार्या। १०**

१ न च "पदार्थः पदार्थेनान्वेति" इति व्युत्पत्तिविरोधः, सम्पन्नो व्रीहिरित्यनेकव्रीहितात्पर्यकेऽप्येकवचनदर्शनेन तादृश्युत्पत्तिसंकोचस्यावश्यकत्वात्।

२ न च धर्मितावच्छेदकतासम्बन्धेन द्रव्यत्वादौ तादृशान्वयबोधोत्पत्तिप्रयोजिका द्रव्यपदजन्यद्रव्यत्वावच्छिन्नविशेष्यकोपस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्येव, धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकसंसर्गताविरहेऽपि द्रव्यत्वादिनिष्ठायास्तत्कार्यतावच्छेदकधर्मघटकत्वात्।

३ अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः। घटो घटः दण्डवान् दण्डवान् पाकं पचति इत्यादौ घटत्वदण्डवत्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावछिन्नस्य तथाविधान्वयबोधानुदयात्।

४ एवं जात्याकृतिव्यक्तयः पदार्थः इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्यैकचनान्ततोपपत्तिः।

प्रश्नः ७ 'साजात्यञ्च विभक्ति विभाजकप्रथमात्वादिना न तु समानानुपूर्विकत्वं साजात्यम्' अस्याः पङ्क्तेः सप्रङ्गं सोदाहरणञ्च व्याख्यां कृत्वा ग्रन्थकारा-भिमतं साजात्यं निरूपयत।

**प्रश्नः ८ 'नीलो घटः' इत्यत्र विशेष्यविशेषणयोः समानवचनत्वनियमेऽपि समानवचनत्वं तथा परिष्कुरुत येन 'वेदाः प्रमाणम्' इत्यत्र प्रसक्तिर्न स्यात्।**

**प्रश्नः ९ क्रियाविशेषणानां अभेदान्वयाकाङ्क्षास्वरूपं निरूपयत।**

**प्रश्नः१० 'घटो घटः' इत्यत्र शाब्दबोधवारणाय किमभिहितं व्युत्पत्तिवादप्रणेत्रा इति सविस्तरं लिखन्तु।**

**प्रश्नः११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ मीमांसकमतानुसारं कुत्र शक्तिर्विद्यते ?

२ नामार्थस्य कुत्र लक्षणा स्वीक्रियते ?

३ संख्यायाः नामार्थत्वम् अस्ति/नास्ति ?

४ विभक्तिषु कारकाणां वाचकत्वम्/द्योतकत्वम् अस्ति ?

५ वृत्तिः कतिविधा भवति ?

६ शुश्रूषा कस्याः वृत्तेः उदाहरणम् अस्ति ?

७ केषां मतानुसारं समासे शक्तिर्विद्यते ?

८ शब्दः कतिविधः ?

९ व्युत्पत्तिवादस्य प्रणेताः कः ?

१० व्युत्पत्तिवादस्य का व्युत्पत्तिः ?

११ स्वसमानविभक्तिकेन पदेन उपस्थितस्य प्रातिपदिकार्थे अभेदः सम्बन्धः कुत्र भवति ?

१२ 'वेदाः प्रमाणम्' इत्यत्र कः सम्बन्धः?

१३ क्रियाविशेषणे किं लिङ्गं भवति ?

१४ क्रियाविशेषणे किं कारकत्वं स्वीक्रियते ?

१५ 'स्तोकः पाकः' इत्यत्र पाकः सार्थकप्रत्ययान्तः/असार्थकप्रत्ययान्तः?

***